# अध्याय 2 : दुर्बुद्धिः विनश्यति

**प्रश्न 1:**

उच्चारणं कुरुत-

| | | |
|---|---|---|
| फुल्लोत्पलम् | अवलम्ब्य | पक्त्वा |
| कम्बुग्रीवः | आवाभ्याम् | भक्षयिष्यामि |
| उक्तवान् | ह्रदम् | सुहृदाम् |
| भवद्भ्याम् | उड्डीयते | भ्रष्टः |

**उत्तर 1:**

स्वयं करें-

**प्रश्न 2:**

एकपदेन उत्तरत-

(क) कूर्मस्य किं नाम आसीत्?

(ख) सरस्तीरे के आगच्छन्?

(ग) कूर्मः केन मार्गेण अन्यत्र गन्तुम् इच्छति?

(घ) लम्बमानं कूर्मं दृष्ट्वा के अधावन्?

**उत्तर 2:**

(क) कम्कबुग्रीवः

(ख) धीवराः

(ग) आकाशमार्गेण

(घ) गोपालकाः

**प्रश्न 3:**

अधोलिखितवाक्यानि कः कं प्रति कथयति इति लिखत-

| | कः कथयति | कं प्रति कथयति |
|---|---|---|
| **यथा-** प्रातः यद् उचितं तत्कर्त्तव्यम्। | **हंसौ** | **कूर्मं प्रति** |
| (क) अहं भवद्भ्यां सह आकाशमार्गेण गन्तुम् इच्छामि। | .................... | .................... |

| | | | |
|---|---|---|---|
| (ख) | अत्र कः उपायः? | .................... | .................... |
| (ग) | अहम् उत्तरं न दास्यामि। | .................... | .................... |
| (घ) | यूयं भस्म खादत। | .................... | .................... |

## उत्तर 3:

| | | | |
|---|---|---|---|
| (क) | अहं भवद्भ्यां सह आकाशमार्गेण गन्तुम् इच्छामि। | **कूर्मः** | **हसौ प्रति** |
| (ख) | अत्र कः उपायः? | **हंसौ** | **कूर्मं प्रति** |
| (ग) | अहम् उत्तरं न दास्यामि। | **कूर्मः** | **हंसौ प्रति** |
| (घ) | यूयं भस्म खादत। | **कूर्मः** | **गोपालकान् प्रति** |

## प्रश्न 4:

मञ्जूषातः क्रियापदं चित्वा वाक्यानि पूरयत-

| | | | | | |
|---|---|---|---|---|---|
| अभिनन्दति | भक्षयिष्यामः | इच्छामि | वदिष्यामि | उड्डीयते | प्रतिवसति स्म |

(क) हंसाभ्यां सह कूर्मोऽपि ....................।

(ख) अहं किञ्चिदपि न ....................।

(ग) यः हितकामानां सुहृदां वाक्यं न ....................।

(घ) एकः कूर्मः अपि तत्रैव ....................।

(ङ) अहम् आकाशमार्गेण अन्यत्र गन्तुम् ....................।

(च) वयं गृहं नीत्वा कूर्मं ....................।

## उत्तर 4:

(क) हंसाभ्यां सह कूर्मोऽपि **उड्डीयते**।

(ख) अहं किञ्चिदपि न **वदिष्यामि**।

(ग) यः हितकामानां सुहृदां वाक्यं न **अतिभनन्दति**।

(घ) एकः कूर्मः अपि तत्रैव **प्रतिवसति**।

(ङ) अहम् आकाशमार्गेण अन्यत्र गन्तुम् **इच्छामि**।

(च) वयं गृहं नीत्वा कूर्मं **भक्षयिष्यामः**।

**प्रश्न 5:**

पूर्णवाक्येन उत्तरत-

(क) कच्छप: कुत्र गन्तुम् इच्छति?

(ख) कच्छप: कम् उपायं वदति?

(ग) लम्बमानं कूर्मं दृष्ट्वा पौरा: किम् अवदन्?

(घ) कूर्म: मित्रयो: वचनं विस्मृत्य किम् अवदत्?

**उत्तर 5:**

(क) कच्छप: आकाशमार्गेण अन्यत्र गन्तुम् इच्छति।

(ख) कच्छप: उपायं वदति–''युवां काष्ठदण्डम् चञ्च्वा धारयतम्, अहं काठष्ठदण्डमध्ये अवलम्ब्य युवयो: पक्षबलेन सुखेन गमिष्यामि।''

(ग) लम्बमानं कूर्मं दृष्ट्वा गोपालका: अवदन्ख्र ''हंहो! महादाश्चर्यं, हंसाभ्याम् सह कूर्मोऽपि उड्डीयते।''

(घ) कूर्म: मित्रयो: वचनं विस्मृत्य अवदत्–''यूयं भस्म खादत।''

**प्रश्न 6:**

घटनाक्रमानुसारं वाक्यानि लिखत-

(क) कूर्म: हंसयो: सहायतया आकाशमार्गेण अगच्छत्।

(ख) पौरा: अकथयन्-वयं पतितं कूर्मं खादिष्याम:।

(ग) कूर्म: हंसौ च एकस्मिन् सरसि निवसन्ति स्म।

(घ) केचित् धीवरा: सरस्तीरे आगच्छन्।

(ङ) कूर्म: अन्यत्र गन्तुम् इच्छति स्म।

(च) लम्बमानं कूर्मं दृष्ट्वा पौरा: अधावन्।

(छ) कूर्म: आकाशात् पतित: पौरै: मारितश्च।

(ज) 'वयं श्व: मत्स्यकूर्मादीन् मारयिष्याम:' इति धीवरा: अकथयन्।

## उत्तर 6:

(क) कूर्मः हंसा च एकस्मिन् सरसि निवसन्ति स्म।
(ख) केचित् धीवराः सरस्तीरे आगच्छन्।
(ग) 'वयं श्वः मत्स्यकूर्मादीन् मारिष्यामः' इति धीवराः अकथयन्।'
(घ) कूर्मः अन्यत्र गन्तुम् इच्छति स्म।
(ङ) कूर्मः हंसयोः सहायतया आकाशमार्गे अगच्छत्।
(च) लम्बमानं कूर्मं दृष्ट्वा गोपालकाः अधावन्।
(छ) गोपालकाः अकथयन्–वयं पतितं कूर्मं खादिष्यामः।
(ज) कूर्मः आकाशात् पतितः गोपालकैः मारितश्च।

## प्रश्न 7:

मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत–

| | | | | |
|---|---|---|---|---|
| जलाशयम् | अचिन्तयत् | वृद्धः | दुःखिताः | कोटरे |
| वृक्षस्य | सर्पः | आदाय | समीपे | |

एकस्य वृक्षस्य शाखासु अनेके काकाः वसन्ति स्म। तस्य वृक्षस्य .................. एकः सर्पः अपि अवसत्। काकानाम् अनुपस्थितौ .................. काकानां शिशून् खादति स्म। काकाः .................. आसन्। तेषु एकः .................. काकः उपायम् ..................। वृक्षस्य .................. जलाशयः आसीत्। तत्र एका राजकुमारी स्नातुं ............... आगच्छति स्म। शिलायां स्थितं तस्याः आभरणम् .................... एकः काकः वृक्षस्य उपरि अस्थापयत्। राजसेवकाः काकम् अनुसृत्य .................. समीपम् अगच्छन्। तत्र ते तं सर्पं च अमारयन्। अतः एवोक्तम्–उपायेन सर्वं सिद्ध्यति।

## उत्तर 7:

एकस्य वृक्षस्य शाखासु अनेके काकाः वसन्ति स्म। तस्य वृक्षस्य **कोटरे** एकः सर्पः अपि अवसत्। काकानाम् अनुपस्थितौ **सपः** काकानां शिशून् खादति स्म। काकाः **दुःखिताः** आसन्। तेषु एकः **वृद्ध** काकः उपायम् **अतिचन्तय्**। वृक्षस्य **समीपे** जलाशयः आसीत्। तत्र एका राजकुमारी स्नातुं **जलाशयम्** आगच्छति स्म। शिलायां स्थितं तस्याः आभरणम् **आदाय** एकः काकः वृक्षस्य उपरि अस्थापयत्। राजसेवकाः काकम् अनुसृत्य **वृक्षस्य** समीपम् अगच्छन्। तत्र ते तं सर्पं च अमारयन्। अतः एवोक्तम्–उपायेन सर्वं सिद्ध्यति।